श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री वरदाचार्य दासेन कृता

# ॥ श्री रङ्गरामानुजस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रङ्गरामानुजस्तुतिः ॥

रङ्गरामानुजयतिः जगद्विख्यात पण्डितः।
समर्पितान् नमस्कारान् प्रतिगृह्णातु मामकान्॥ 1 ॥

रङ्गरामानुजयतेः यः पुमान् दृष्टिगोचरः।
स श्लाघ्यस्स गुणी धन्यः स ज्ञानीत्युच्यते बुधैः॥ 2 ॥

कर्णादयो हि दातारः याचितृभ्यो धनं ददुः।
अयाचितारोऽपि धनं प्राप्नुवन्ति यतीश्वरात्॥ 3 ॥

अशक्यमिति यत्कर्म त्यज्यतेऽन्यैर्महात्मभिः।
तदेव पूर्यते शीघ्रं भवद्भिः विबुधोत्तमैः॥ 4 ॥

संप्रदायग्रन्थलोपो न भवेदिति चिन्तया।
मुद्रीक्रियन्ते सद्ग्रन्था भवद्भिर्देशिकोत्तमैः॥ 5 ॥

स्वेच्छां पूरयितुं सर्वे मानवाः कुर्वते तपः।
तपसस्तपसा नूनं अवतीर्णो न संशयः॥ 6 ॥

रङ्गरामानुजो यत्र तत्र सन्निहितो हरिः।
तत्स्थलं मथुराऽयोध्या तत्स्थलं भुक्तिमुक्तिदम्॥ 7 ॥

सिद्धान्तरक्षणे दक्षान् परवादिभयङ्करान्।
भवच्छिष्यान् लक्ष्मणार्यो वीक्ष्य संमोदते ध्रुवम्॥ 8 ॥

इमे श्लोकास्समर्प्यन्ते भवच्चरणयोर्मुदा।
त्याज्या दोषा गुणा ग्राह्या यतिराज गुरूत्तम॥ 9 ॥

॥ इति श्री रङ्गरामानुजस्तुतिः समाप्ता ॥